National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(47): 208-210
© 2023 NJHSR
www.sanskritarticle.com

**प्रो.विजयपालकच्छवाह**
आचार्यः विभागाध्यक्ष,
शिक्षाशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः,पुरी, ओडिशा

**Correspondence:**
**प्रो.विजयपालकच्छवाह**
आचार्यः विभागाध्यक्ष,
शिक्षाशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः,पुरी, ओडिशा

# पाठ्यक्रमस्य दार्शनिकाधाराः

**प्रो.विजयपालकच्छवाह**

कस्यापि प्रकारस्य शिक्षाम् अथवा प्रशिक्षणार्थं निर्धारितविषयाणां, उपविषयाणां तथा सम्बन्धित-सामग्रीणां व्यवस्थितरीत्या संक्षेपेण प्रस्तुतीकरणं पाठ्यक्रमः इति कथ्यते। पाठ्यक्रमः प्रायः कयापि परिषद्वारा निर्धार्यते। अथवा केनापि प्राध्यापकेन निर्मीयते यत् विषयस्य गुणवत्तानिमित्तम् उत्तरदायी भवति। समुचितपाठ्यक्रमस्य शिक्षाक्षेत्रे महत्वपूर्णस्थानं विद्यते।

**परिभाषा-**

- ❖ पाठ्यक्रमः कलाकारस्य हस्ते तद् यन्त्रम् अस्ति यस्य माध्यमेन सः स्वसामग्रीं स्वादर्शानुरूपं स्वछायाचित्रनिर्मितस्थाने निर्माति।
- ❖ पाठ्यक्रमे ते समस्ता अनुभवाः निहिताः भवन्ति ये विद्यालयद्वारा शिक्षया उद्देश्यानां प्राप्त्यर्थम् उपयोगार्थम् आनीयन्ते इति **मुनरो।**
- ❖ पाठ्यक्रमः तत् साधनमस्ति यस्य माध्यमेन वयं शिक्षायाः उद्देश्यानि प्राप्तुं समुपयोगं कुर्मः इति **हेनरी जे आटो।**

**पाठ्यक्रमस्य प्रकाराः**

**परीक्षापाठ्यक्रमः**

- व्याकरणपाठ्यक्रमः
- विद्यार्थिनिर्मितपाठ्यक्रमः
- कोषपाठ्यक्रमः
- मिश्रितपाठ्यक्रमः
- अन्तर्जालशिक्षणपाठ्यक्रमः
- सान्दर्भिकपाठ्यक्रमः
- कौशल्याधारितपाठ्यक्रमः
- पठ्यविधानपाठ्यक्रमः

**शिक्षायाः पाठ्यचर्या-**

न्यायदर्शने प्रत्यक्षस्य लौकिकम् अलौकिकं चेति पक्षद्वयम् अभिहितम्। अनेन ज्ञायते यत् न्यायदर्शनानुसारं शिक्षायाः पाठ्यचर्या लौकिकम् अलौकिकं च भवतीति। लौकिकविषयाः - भाषा, साहित्यम्, व्याकरणम्। अत्र लौकिकशिक्षायाः उद्देश्यं तु दृश्यमानजगतः परिचयप्रदानम्। न्यायदर्शने यत् तर्कस्य आश्रयः वर्तते तत् ज्ञानस्य सूचकः अस्ति। अतः संसारः तस्यैव वस्तुनः अवगमप्रक्रियायां समेषां सांसारिकविषयाणाम् अध्ययनाय निर्धारयितुं शक्यते। किन्तु केवलम् अनुमानापक्षामाधृत्य वक्तुं शक्यते। अस्य लिखितरूपेणाधारः नोपलभ्यते। तर्कशास्त्रम् अवश्यं शिक्षायाः पाठ्यचर्याविषयः भवितव्यः इति स्फुटम्। यतः न्यायदर्शनं वाकोवाक्यं, अन्वीक्षकी, पञ्चावयवादिभ्यः प्रसिद्धः वर्तते। अतः तर्कशास्त्रं लौकिकज्ञानस्य विषयेत्वेन स्वीकर्तुं शक्यते।

अलौकिकस्य तु दर्शनशास्त्रं, आध्यात्मशास्त्रं, आत्मानुभूतिः इत्यादीनाम् अन्तर्ज्ञानस्य प्रक्रिया वर्तते। ईश्वरप्रामाण्यविषयः न्याय-दर्शने "मिति" नाम्ना प्रख्यातं विद्यते। "मितिः सम्यक् परिच्छित्तिः" इति उदयनाचार्याः। अनेन प्रमा अपि प्रोच्यते। न्यायदर्शना-भ्युपगन्तष्णां तर्कः एवं प्रमाणं स्फुटं वर्तते। यतः विभिन्नमतानां दार्शनिकविचाराणाम् अध्ययनं विहितमस्ति। अनेन इदं प्रत्यक्षं ज्ञायते यत् न्यायदर्शनानुसारं शिक्षायाः पाठ्यचर्या न केवलं अलौकिकज्ञानान्तर्गतं अपितु अन्यदर्शनानाम् चिन्तनं विभूषितम् अस्ति। अतः शिक्षायाः पाठ्यचर्या दर्शनशास्त्रेण आध्यात्मशास्त्रेण च संवलितम् इति वक्तुं शक्यते।

**वैशेषिकदर्शनशिक्षायाः पाठ्यचर्या-**

वैशेषिकदर्शनशिक्षायाः पाठ्यचर्या पदार्थः अथवा वस्तोः ज्ञाना-धारितम् अस्ति। पदार्थस्य विश्लेशणम् एवं विभाजनस्याधारे वैशेषिकदर्शनेन संस्तुतान् पाठ्यक्रमान् बोधनप्रयत्नः क्रियते।

आधारेऽस्मिन् वैशेषिकदर्शनस्य पाठ्यचर्यायां दर्शनशास्त्रम्, धर्म-शास्त्रम्, नीतिशास्त्रम्, तर्कशास्त्रमित्यादि स्वीकृतमस्ति। उपर्युक्त-शास्त्रं विना वैशेषिकदर्शनस्य सूत्राणामवबोधः कठिनं भवति। अनेन दर्शनस्य पाठ्यक्रमे मनोविज्ञानम्, विज्ञानं भौतिकमेवं रासायनिक-विज्ञानयोः स्थानमनिवार्यमासीत्।

**सांख्यदर्शनानुसारं पाठ्यचर्या-**

सांख्यदर्शने प्रकृतिपुरुषयोः विवेचनं करोति। तत्र प्रकृतेः महत्त्वं विद्यते। क्य प्रकृतिः ? प्रकृतौ किं तत्त्वं वर्तते ? इति ज्ञानम् अवश्यं प्राप्तव्यम्। प्रकृतौ पञ्चमहाभूतानि पृथिवी, आपः, आकाशः, वायुः, अग्नि इति। अद्यत्वे अस्यैव ज्ञानस्य विज्ञानम् इति कथ्यते। सांख्यदर्शने बुद्धिः, अहंकारः, इन्द्रियाणि इत्यादीनां विवेचनं भवतीत्यतः अद्यतन मनोविज्ञानसम्बद्धविचारः पाठ्यक्रमे अस्तीति वक्तुं शक्यते। पुरुषस्य तात्पर्यम् आत्मा इत्यतः स्वीकृतम्। अतः आध्यात्मविषयाः पाठ्यक्रमे सन्तीति वक्तुं शक्यते। एवमेव सांख्यदर्शने संसारस्यापि विवेचनं वर्तते। यथा- मानवस्य त्रिगुणात्मकस्वभावः, संस्कारः, व्यवहारः इत्यादयः।

सांसारिकोपभोगेन सह योगः, ब्रह्मचर्यादि विषयाः अपि परिशीलिताः। यथा उक्तम्-

"प्रणति ब्रह्मचर्योपासर्पणानि कृत्वा सिद्धिर्बहुकालात् तद्वत्"। अनेन ज्ञायते पाठ्यचर्यायां विभिन्नप्रकारकाः क्रियाः वर्तन्ते इति।

एवं विचारविमर्शनेन स्पष्टम् भवति यत् सांख्यदर्शनानुसारं पाठ्यक्रमः मनोवैज्ञानिकः विकासावस्थानुकूलः, व्यापकविषयेण मिश्रितः भूत्वा जीवन-लक्ष्यसाफल्यार्थं योग्यमासीत्।

**योगदर्शनानुसारं पाठ्यचर्या-**

पतञ्जलिना प्रणीतं योगशास्त्रं संयमपूर्णजीवनस्य निर्माणपुरस्सरं कैवल्यप्राप्तिमार्गमुपदिशति। शिक्षा जीवनं वर्तते उत जीवनस्य विभिन्नपक्षाणां विकासस्य विशिष्टव्यवस्थायाः प्रक्रिया विद्यते। योगश्चित्तवृत्तिनिरोधः इति सूत्रेण ज्ञायते यत् योगः कः ? चित्तं किमस्ति ? का विशेषता ? चित्तनिरोधार्थम् आष्टाङ्गयोगसाधनस्य उपायाः के ? इत्यादीनाम् उत्तरं योगशास्त्रस्य पाठ्यक्रमे उपलभ्यते। अत्र धर्मशास्त्रस्य दर्शनशास्त्रस्य नीतिशास्त्रस्य मनोविज्ञानस्य शरीरविज्ञानस्य योगाभ्यासस्य च शारीरिकक्रियायाः अवकाशः आसीत्।

**मीमांसाशिक्षादर्शने पाठ्यक्रमः -**

**तपोविषेशैर्विविधैर्व्रतैश्च विधिचोदितैः।**
**वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना**

व्रतैश्चोपनिषन्महानाम्निकादिभिर्विधिदेशितैःस्वगष्ह्यविहितैः समग्रवेदो मन्त्रब्राह्मणात्मकः सोपनिषत्कोऽप्यध्येतव्यः। रहस्यमुप-निषदामध्ययनं विहितम्। "वेदाभ्यासो हि विप्रस्य तपः परमिहो-च्यते" इति। अतस्तावत्-

**वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।**
**अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्।।**
**इति साङ्गवेदाध्ययनं कर्तव्यमित्यवगम्यते।**
**अङ्गानि वेदाश्चत्वारो पुराणन्यायविस्तरः।**
**आर्शं धर्मोपदेशश्च विद्या ह्येताश्चतुर्दश।।** इति।

धर्माधर्मविवेकं प्राप्य धर्मानुष्ठाने प्रवर्तयेत्। अतस्तावत् जैमिनिः -

**प्रमाणभेदशेशत्वं प्रयुक्तिक्रमसंज्ञकाः।**
**अधिकारोऽतिदेशश्च सामान्येन विषेशतः।।**
**ऊहो बाधश्च तन्त्रश्च प्रसङ्गश्चोदिताः क्रमात्।।**

इति द्वादशलक्षणीं विरच्य लौकिकवैदिककर्मानुष्ठानज्ञानं विविधै-र्न्यायैः लोकान् उद्धारयामास। तदेवं स्पष्टीकरोति मुखर्जि महाभागः-

The ancient view that more intellectual development without the development of character] learning without piety, proficiency in the sacred lore with a deficiency in the practices it implies, with defeat the very ends of studentship. Thus, the part of education that deals with the life of the students probably fills a larger place in the ancient pedagogic scheme than the part that deals with the mere intellect.

**उपनिषद् शिक्षायाः पाठ्यचर्या -**

उपनिषद् शिक्षायाः पाठ्यक्रमः न केवलं सैद्धान्तिकम् अपि तु व्यावहारिकम् अनुभूत्याधारितमासीत्। प्रो.विद्यासागरमहोदयस्य मतानुसारम्- उपनिषत्काले तस्याः शिक्षायाः स्थानं भवति स्म। यया आन्तरिकजिज्ञासायाः मार्जनं भवेत्। उपनिषद् शिक्षापाठ्यक्रमः व्यक्तित्ववादी समाजवादी च आसीत्। अतः पाठ्यचर्यायां पराविद्या अपराविद्या च आसीत्। एते विद्ये मुण्डकोपनिषदि प्रेयस्, श्रेयस् इति नाम्ना ख्यायते।

परा अपरा च अनयोः सिद्धान्तेषु उपनिषद् शिक्षा पाठ्यक्रमे भौतिक-वस्तूनाम् अध्ययनं प्रकृतिः, जीवविज्ञानम्, सामाजिक-विज्ञानम्, नागरिकशास्त्रम्, इतिहासः, भूगोलः, कृषिः, कला, यान्त्रिकी, नक्षत्रविद्या भाषा, साहित्यम्, स्वास्थ्यम्, शरीरम्, क्रीडा, व्यायामः ब्रह्मविद्या, ब्रह्मविद्या तर्कः, विज्ञानम्, मनोविज्ञानम्, धर्मशास्त्रम्, नैतिकशास्त्रम्, योगविद्या तपः साधना इत्यादीनां समुचितमध्ययनं भवति स्म। अस्य प्रमाणं छान्दोग्योपनिषदि प्राप्यते यदा सनत्कुमारः नारदं पृच्छति यत् भवता किमधीतम् ? अस्योत्तरं नारदः एवं ददाति-

**ऋग्वेदं भगवह अध्येहि, यजुर्वेदमथर्वणं चतुर्थम्।**
**इतिहासं पुराणं पञ्चमं वेदानां वेदं पित्र्यं शशिं दैवं निधिम्।।**

वाक्योवाक्यम् एकायनं देवविद्या ब्रह्मविद्या भूतविद्याम् एतत् भगवह अध्येहि।

**गीतायां पाठ्यक्रमः -**

गीतायां पाठ्यक्रमः द्विधा विभक्ता विद्यते परा विद्या अपरा विद्या इति। तत्र भौतिकजगतः ज्ञानं अपरा विद्यया लभ्यते। पराविद्यया तु अत्मानः विषये स्पष्टं ज्ञानं लभ्यते। अपरा विद्या परा विद्यायाः प्राप्तिनिमित्तम्। एवं गीतायां प्रकृत्यनुकूलः पाठ्यक्रमः वर्तते।

**सन्दर्भग्रन्थसूची**


१.**शिक्षा के दार्शनिक एवं सामाजिक आधार**- डा. के.पी.पाण्डेय, विश्वविद्यालय प्रकाशन, वारणासी।

२.**वैदिक शिक्षा पद्धति** - भास्कर मिश्र, महर्षिसान्दीपनि राष्ट्रिय वेद विद्या प्रतिष्ठान, उज्जैन।

३.**भारतीय शिक्षा का इतिहास** - बी.पी.जौहरि, पी.डी.पाठक, विनोद पुस्तक मन्दिर आगरा।

४. **उदीयमान भारतीय समाज में शिक्षा** - डा.जे.एस. वालिया, अहम् पाल पब्लिशर्स, गोपाल नगर, जालन्धर, पंजाब

५.**सर्वदर्शनसंग्रह** - उमाशंकर शर्मा ऋषि, चौखम्बा विद्याभवन,वारणासी।